# 61 - एकषष्टितम दशकम्
# विप्र पत्नी अनुग्रम्

ततश्च वृन्दा-वनतोऽति दूरत: वनं गतस् त्वं खलु गोप गोकुलैः ।
हृदन्तरे भक्ततर द्विजाङ्गना: कदम्ब कानुग्रह णाग्रहं वहन् ॥॥61-1॥

ततो निरीक्ष्या शरणे वनान्तरे किशोर लोकं क्षुधितं तृषा कुलम् ।
अदूरतो यज्ञपरान् द्विजान् प्रति व्यसर्जयो दीदिवि याचनाय तान् ॥॥61-2॥

गतेष्वथो तेष्वभिधाय तेऽभिधां कुमारकेष्वोदन याचिषु प्रभो ।
श्रुति स्थिरा अप्यभिनिन्यु रश्रुतिं न किञ्चि दूचुश्च मही सुरोत्तमा: ॥॥61-3॥

अनादरात् खिन्नधियो हि बालका: समाययुर् युक्त मिदं हि यज्वसु ।
चिराद भक्ता: खलु ते महीसुरा: कथं हि भक्तं त्वयि तैस्समर्प्यते ॥॥61-4॥

निवेदयध्वं गृहिणी जनाय मां दिशेयु रन्नं करुणा कुला इमा: ।
इति स्मितार्द्रं भवते रिता गता: ते दारका दारजनं ययाचिरे ॥॥61-5॥

गृहीत नाम्नि त्वयि सम्भ्र माकुला: चतुर् विधं भोज्य रसं प्रगृह्य ता: ।
चिरं धृत त्वत् प्रविलोक नाग्रहा: स्वकैर् निरुद्धा अपि तूर्ण माययु: ॥॥61-6॥

विलोल पिञ्छं चिकुरे कपोलयो: समुल्लसत् कुण्डल मार्द्र मीक्षिते ।
निधाय बाहुं सुहृदं स सीमनि स्थितं भवन्तं समलोकयन्त ता: ॥॥61-7॥

तदा च काचित् त्वदुपाग मोद्यता गृहीत हस्ता दयितेन यज्वना ।
तदैव सञ्चिन्त्य भवन्त मञ्जसा विवेश कैवल्य महो कृतिन् यसौ ॥॥61-8॥

आदाय भोज्यान् यनुगृह्य ता: पुन: त्वदङ्ग सङ्ग स्पृहयोज् झतीर् गृहम् ।
विलोक्य यज्ञाय विसर्जयन् निमा: चकर्थ भर्तृ नपि तास्वगर्हणान् ॥॥61-9॥

निरूप्य दोषं निज मङ्गनाजने विलोक्य भक्तिं च पुनर् विचारिभिः
प्रबुद्ध तत्त्वैस्त्व मभिष्टुतो द्विजैः मरुत्पुराधीश निरुन्धि मे गदान् ॥॥61-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥